# षष्ठः पाठः

# भुवि पूर्वं न दृश्यते।

## पाठप्रवेशः

भगवदज्जुकम्
(प्रहसनम्)
रचना - बोधायनः।

दृश्यकाव्यं रूपकमिति व्यवह्रियते । रूपकाणि नाटकादिभेदेन दश भवन्ति। तेषु अन्यतमं प्रहसनमिति कथ्यते । अमानुषवृत्तीनां कल्पना, अस्पष्टभाषणं, भाषाप्रयोगेषु वैकल्यम् इत्यादीनि हास्यरसप्रधानेषु प्रहसनेषु प्रायेण दृश्यन्ते । संस्कृते महेन्द्रविक्रमस्य मत्तविलासप्रहसनम्, बोधायनस्य भगवदज्जुकं च प्रहसनेषु प्रसिद्धे स्तः। भगवदज्जुकात् समाकलितोऽयं पाठभागः।

## आमुखम्

कथासन्दर्भः।

कस्यचित् परिव्राजकस्य शिष्यो भवति शाण्डिल्यः । भोजनैकप्रियः पठनविमुखः सः बहुवारं गुरुणा सह तर्कयति। विद्वानिति स्वयं मत्वा असाधुभिरेव वाग्भिः जल्पति च। कदाचित् गुरुशिष्यौ कस्मिंश्चित् आरामे उपाविशताम्। तदैव वसन्तसेना चेट्या सह तत्र आगच्छति। सा तु विषसर्पदंशनेन मूर्छति। अत्रान्तरे अन्यस्याः वसन्तसेनाभिधायाः प्राणान् हर्तुमागतः यमकिङ्करः प्रमादेन अस्याः वसन्तसेनायाः प्राणान् अपहरति च। अयमेव कथासन्दर्भः।



(एकं मनोहरमुद्यानम्। उद्यानस्य एकस्मिन् पार्श्वे परिव्राजकेन सह शाण्डिल्यः संवदति। अपरस्मिन् पार्श्वे वसन्तसेना नामिका अज्जुका सख्या सह उद्यानं प्रविशति।)

अज्जुका - (उद्यानसैन्दर्यं वीक्ष्य) अत्र उपविशावः।

मधुकरिका - अज्जुके! अत्र उपविश्य गानमेकम् आलपतु।
(उभे उपविशतः। अज्जुका गायति। उद्यानस्य अपरस्मिन् पार्श्वे-)

शाण्डिल्यः - (कर्णं दत्वा) आहा! पञ्चमनादः, नहि नहि पिकनादः एव। न पुनः किम्? (आलोच्य) मधुरस्वरेण काचित् गायति। सा का इति अन्विष्य आगच्छामि। (गच्छति।) (परितो निरीक्ष्य) हा! उद्यानदेवता इव सर्वाभरणविभूषिता इयं का?
(गगनात् यमकिङ्करः आगच्छति)

यमकिङ्करः - (आत्मगतम्) यस्य आयुषः अन्तम् आगच्छति तस्य जीवापहरणमेव मम धर्मः। वनपर्वतान् अनेकानि राज्यानि च उत्तीर्य अहं मनोवेगेन अत्र आगतःअस्मि। (परितो निरीक्ष्य) सा वसन्तसेना कुत्र? इदानीं तस्याः आयुषः अन्त्यम् आगच्छति। अन्विष्यामि। (परितः ससूक्ष्मं निरीक्ष्य अज्जुकां दृष्ट्वा आत्मगतम्) आहा! इयमेव सा वसन्तसेना। ईषत् निमेषम् अवशिष्यते। तावत् पर्यन्तं विश्रम्य अस्याः प्राणान् अपहरामि।

अज्जुका - (ससंभ्रमम्) सखि! मम पादे कश्चित् दशति वा? हा! सर्पः सर्पः (उच्चैः वदति)

मधुकरिका - (समीपमागत्य दृष्ट्वा) हा। सर्पः, सर्पः। अये! पश्यतु। अज्जुका सर्पदंशनेन परिक्लिन्ना अभवत्।( विलपति)

शाण्डिल्यः - (तत् श्रुत्वा) अविहा। एषा अज्जुका सर्पेण दष्टा।

परिव्राजकः - क्षीणेनास्याः कर्मणा भवितव्यम्।

**स्वकर्म भोक्तुं जायन्ते प्रायेणैव हि जन्तवः।**
**क्षीणे कर्मणि चान्यत्र पुनर्गच्छन्ति देहिनः॥**

अज्जुका - सीदति मे शरीरम्। उद्भवन्ति इव मे प्राणाः। शयितुम् इच्छामि। (मूर्च्छिता)



| | | |
|---|---|---|
| मधुकरिका | - | हा ! हता खलु अज्जुका । |
| यमकिङ्करः | - | (आत्मगतम्) हन्त ! अस्याः प्राणाः मया अपहृताः । अहं चित्रगुप्तसमीपम् एतां नयामि । (यमलोकं प्रतिगच्छति ।) |
| शाण्डिल्यः | - | भगवन् !, परित्यजति एषा प्राणान् । |
| परिव्राजकः | - | अरे मूर्ख ! परमप्रियाः हि प्राणिनां प्राणाः । प्राणैरेव परित्यज्यते शरीरम् इति वक्तव्यम् । |
| शाण्डिल्यः | - | आ । अपेहि ! अकरुण! निःस्नेह! कर्कशहृदय! दुष्टबुद्धे! भिन्नचारित्र! क्रूर! शठ ! मूढ! .. |
| परिव्राजकः | - | किमभिप्रेतं भवता ? |
| शाण्डिल्यः | - | नामाष्टशतं ते पूरयिष्यामि । |
| परिव्राजकः | - | तर्हि छन्दतः। |

| | | |
|---|---|---|
| शाण्डिल्यः | - | भो भगवन् ! दुःखितोऽस्मि। |
| परिव्राजकः | - | किमर्थम्? |
| शाण्डिल्यः | - | एषा अस्माकं स्वजना। |
| | | (एवमुक्त्वा शाण्डिल्यः अज्जुकायाः समीपं गच्छति) |
| परिव्राजकः | - | कथं ? स्वजनो नाम ? (उत्तरं दातुं शाण्डिल्यः न यतते) |
| शाण्डिल्यः | - | हा अज्जुके! हा प्रियसम्पन्ने! हा मधुरगायिनि! |
| मधुकरिका | - | (शाण्डिल्यस्य प्रवृत्तिं वीक्ष्य) आर्य! किमिदम्? |
| शाण्डिल्यः | - | भवति! स्नेहः। |
| मधुकरिका | - | (आत्मगतम्) युज्यते। सर्वानुकम्पी साधुजनो नाम। ( प्रकाशम्) आर्य! मुहूर्त्तम् अज्जुकां परिपालयतु। अहं वैद्यमानयामि। |
| शाण्डिल्यः | - | बाढम्। भवति! इदानीं गच्छतु। |
| मधुकरिका | - | (आत्मगतम्) सानुक्रोशः एष ब्राह्मणः अज्जुकां क्षणादेव परित्यक्तुं सन्नद्धो न भविष्यति। अतः शीघ्रमेव गच्छामि। ( इति निर्गता) |
| शाण्डिल्यः | - | (आत्मगतम्) एषा चेटी गता। अतः स्वैरं रोदामि। (प्रकाशम्) हा अज्जुके! हा मधुरगायिनी! |
| परिव्राजकः | - | शाण्डिल्य! , न कर्तव्यमेतत्। |
| शाण्डिल्यः | - | आ अपेहि, निःस्नेह! मामपि त्वामिह तर्कयसि। |
| परिव्राजकः | - | आगच्छ वत्स, अधीष्व तावत्। ( आलोच्य आत्मगतम्) एषा खलु इदानीं न किञ्चित् जानाति। अस्य मूढस्य प्रत्ययोत्पादनं कर्तुम् अनुयोज्या वेलेयम्। कीदृशो योगः इति प्रदर्शयामि। मृतायाः अस्याः शरीरे अहम् आत्मानं नियोजयामि। (इति विचिन्त्य परिव्राजकः स्वकीयान् प्राणान् अज्जुकायाः देहे नियोजयति) |
| अज्जुका | - | (निद्रातः इव उत्थाय) शाण्डिल्य ! शाण्डिल्य ! |
| शाण्डिल्यः | - | (सहर्षम्) आविहा, जीवति। एषा मधुरगायिनी जीवति। प्रत्यागतप्राणा खल्वेषा। भवति, अयमस्मि। |
| अज्जुका | - | अप्रक्षालितपाणिभ्यां मा स्प्राक्षीः। |
| शाण्डिल्यः | - | अतिचौक्षिणी खल्वियम्। |

| | | |
|---|---|---|
| अज्जुका | - | एहि वत्स! अधीष्व तावत्। |
| | | (तदा मधुकरिका वैद्येन सह प्रविशति) |
| मधुकरिका | - | एतु एतु आर्य। |
| वैद्यः | - | कुत्र सा ? |
| मधुकरिका | - | एषा खलु अज्जुका सत्त्वस्थिता। भुवि पूर्वं न दृश्यते। |
| वैद्यः | - | महान्तं विकारं करोति इयम्। आनय मम सर्वारम्भः। आरभे विषतन्त्रे। (उपविश्य भूमौ मण्डलाकारं रचयित्वा मन्त्रं जपति) कुण्डलकुटिलगामिनि। मण्डलं प्रविश प्रविश। तिष्ठ तिष्ठ। श्रूं श्रूम्। यावत् शिरोवेधं करिष्यामि। कुत्र कुठारिका ? |
| अज्जुका | - | मूर्ख! वैद्य! अलं परिश्रमेण। |
| वैद्यः | - | पित्तमप्यस्ति। तव पित्तं वातं श्लेष्मं च अहं नाशयामि। |



सुन्दरगुलिकाम् आनयामि। (इत्युक्त्वा निष्क्रामति)
( ततः प्रत्यागच्छति परिक्लान्तमुखः यमपुरुषः)

यमकिङ्करः - (आत्मगतम्) इयं सा न। सा वसन्तसेना इयं न। मम प्रमादो अभवत्। अतः यमेन निन्दितोऽस्मि। अतः क्षीणायुषां ताम् अन्यां वसन्तसेनां क्षणमिहानयतु इति यमवचनेन प्रत्यागतोऽहम्। एतस्याः शरीरं यावत् अग्निसंयोगं न स्वीकरोति तावत् एनां सप्राणां करोमि। (आश्चर्येण विलोक्य) अये एषा उत्थिता खलु। सजीवा इयम्। किन्नु खल्विदम्।

अस्याः जीवो मम करे उत्थितैषा वराङ्गना।
आश्चर्यं परमं लोके भुवि पूर्वं न दृश्यते॥

**पदच्छेदः**

| | | |
|---|---|---|
| अचिरादेव | - | अचिरात् + एव। |
| चान्यत्र | - | च + अन्यत्र। |
| प्रायेणैव | - | प्रायेण + एव। |
| पुनर्गच्छन्ति | - | पुनः + गच्छन्ति। |
| क्षणादेव | - | क्षणात् + एव। |
| वेलेयम् | - | वेला + इयम्। |
| उत्थितैषा | - | उत्थिता + एषा। |

**विग्रहः**

| | | |
|---|---|---|
| वनपर्वतान् | - | वनानि च पर्वताश्च वनपर्वताः तान्। |
| जीवापहरणम् | - | जीवस्य अपहरणम्। |
| प्रत्यागतप्राणा | - | प्रत्यागताः प्राणाः यस्याः सा। |
| क्षीणायुषाम् | - | क्षीणम् आयुः यस्याः सा क्षीणायुषा, ताम्। |
| मनोवेगेन | - | मनसः वेगः मनोवेगः, तेन। |
| अतिचौक्षिणी | - | अतिचौक्षम् अस्याः अस्तिति। |

# पठनप्रवर्तनानि



**नाटकं भावानुसारं कक्ष्यायाम् अवतारयतु ।**

**श्रद्धेयाःअंशाः**

आशयावबोधः।
उचितभावः।
उच्चारणशुद्धिः ।



**पाठभागात् सम्बोधनपदानि चित्वा लिखतु ।**

**श्रद्धेयौ अंशौ**

सम्बोधनपदानां प्रत्यभिज्ञानम् ।
चयनसामर्थ्यम् ।



**शाण्डिल्यः इति कथापात्रस्य निरूपणं सूचनानुसारं लिखतु ।**

भगवदज्जुकम्, बोधायनः, हास्यकथापात्रम्

विवेकशून्यः, विकलवाक्यप्रयोक्ता



परिहासप्रियः, पठनविमुखः

भोजनप्रियः, निद्रातत्परः

**श्रद्धेयाःअंशाः**

भाषाशुद्धिः ।
वाक्यघटना ।
सूचनानां स्वीकारः ।

## अधिकवाचनांशं पठित्वा पट्टिकां पूरयतु।

| रूपकम् | ग्रन्थः | ग्रन्थकारः |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| ................ | शृङ्गारभूषणभाणः | वामनभट्टः |
| प्रहसनम् | भगवदज्जुकम् | ................ |
| ................ | मध्यमव्यायोगः | भासः |
| ............ | रुक्मिणीहरणम् | वत्सराजः |
| समवकारः | पञ्चरात्रम् | ............... |
| डिमः | .................. | वत्सराजः |
| प्रकरणम् | मृच्छकटिकम् | ................ |
| अङ्कः | उन्मत्तराघवम् | भास्करः |
| वीथी | .............. | रविपतिः |

**श्रद्धेयः अंशः**

पट्टिकापूरणसामर्थ्यम्।

## क्रियापदपरिचयः

**उपविशामि-** उप + विश् उपवेशने परस्मैपदी लट् उ.पु.ए.व।
उपविशामि- उपविशावः - उपविशामः।

**गायति -** गै गायने परस्मैपदी लट् प्र.पु.ए.व।
गायति - गायतः- गायन्ति।

**अपहरामि -** अप + हृञ् हरणे उभयपदी परस्मैपदे लट् उ.पु.ए.व।
अपहरामि - अपहरावः- अपहरामः।

**परिपालयतु -** परि + पाल रक्षणे परस्मैपदी लोट् प्र.पु.ए.व।
परिपालयतु / परिपालयतात् - परिपालयताम्- परिपालयन्तु।

**रोदिमि -** रुदिर् अश्रुविमोचने परस्मैपदी लट् उ.पु.ए.व
रोदिमि - रुदिवः - रुदिमः।

**अधीष्व -** अधि + इङ् अध्ययने आत्मनेपदी लोट् म.पु.ए.व।
(नित्यम् अधिपूर्वकोऽयं धातुः)
अधीष्व - अधीयाथाम् - अधीध्वम्।

**अस्प्राक्षीः -** स्पृश् संस्पर्शने परस्मैपदी लुङ् म.पु.ए.व।
अस्प्राक्षीः - अस्पृक्षतम् - अस्पृष्ट।

## अधिकवाचनांशः

### अन्वयः

**स्वकर्म भोक्तुं ................पुनर्गच्छन्ति देहिनः ॥**

जन्तवः प्रायेण स्वकर्म भोक्तुम् एव जायन्ते हि कर्मणि क्षीणे सति पुनः देहिनः अन्यत्र गच्छन्ति च।

**अस्याः जीवो ................न दृश्यते ॥**

अस्याः जीवः मम करे (वर्तते) एषा वराङ्गना उत्थिता। एतत् लोके परमम् आश्चर्यं (भवति) पूर्वं भुवि न दृश्यते।

### प्रयोगविशेषः

क्षीणेनास्याः कर्मणा भवितव्यम् (भावेप्रयोगः)
अस्याः कर्माणि क्षीणानि भवेयुः (कर्तरि)

### श्रेद्धेयः अंशः

भगवदज्जुकाख्ये प्रहसने शाण्डिल्यस्य भाषाप्रयोगेषु व्याकरणरीत्या अशुद्धान् प्रयोगान् बहुत्र पश्यामः। एवं पाठभागेऽस्मिन् एतादृशाः द्वित्राः प्रयोगाः दृश्यन्ते। तत्पश्यामः

| **पाठस्थं रूपम्** | - | **शुद्धं रूपम्।** |
|---|---|---|
| नामाष्टशतं ते पूरयिष्यामि। | - | नामाष्टोत्तरशतम्। |
| रोदामि | - | रोदिमि। |
| मधुरगायिनी | - | मधुरगायिनि। |

## कोशः

| | | |
|---|---|---|
| अज्जुका | - | स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका । |
| किङ्करः | - | नियोज्य-किङ्कर-प्रैष्य-भुजिष्य-परिचारकाः। |
| मूर्खः | - | अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः। |
| परिव्राजकः | - | कर्मन्दी रक्तवसनः परिव्राजकतापसौ । |
| अनुक्रोशः | - | कृपादयानुकम्पास्यादनुक्रोशः। |

## व्याकरणविशेषः

**मा स्प्राक्षीः -** अस्प्राक्षीः इति लुङ् रूपम् । माङ् योगे लुङ् लकारः ( माङि. लुङ् ) तथा 'न माङ्योगे' इति अडागमनिषेधश्च ।

## दशरूपकाणां पट्टिका उदाहरणानि च ।

| रूपकम् | ग्रन्थः | ग्रन्थकारः |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| प्रकरणम् | मृच्छकटिकम् | शूद्रकः |
| भाणः | शृङ्गारभूषणभाणः | वामनभट्टः |
| प्रहसनम् | भगवदज्जुकम् | बोधायनः |
| डिमः | त्रिपुरविजयम् | वत्सराजः |
| व्यायोगः | मध्यमव्यायोगः | भासः |
| समवकारः | पञ्चरात्रम् | भासः |
| वीथी | प्रेमाभिरामः | रविपतिः |
| अङ्कः | उन्मत्तराघवम् | भास्करः |
| ईहामृगः | रुक्मिणीहरणम् | वत्सराजः |

भवतः ग्रामे कस्यचित् कलारूपस्य प्रस्तुतीकरणं भवति । तदर्थम् एकं विज्ञप्तिपत्रं/ पोस्टर् सज्जीकरोतु ।